सुहृच्च! सा अस्मास्वती । अणुर्दिशामणामा अङ्गं तणुअं पि तण एइ"। (अवामायन्तीति) कविनिबद्धवक्तृप्रौढोक्तिसिद्धेन काव्यलिङ्गालङ्कारेण तनोस्तनूकरणेऽपि तव हृदये न वर्त्तत इति विशेषोक्त्यलङ्कारो व्यज्यते। न खलु कवेः कविनिबद्धस्येव रागाद्याविष्टता। अतः कविनिबद्धवक्तृप्रौढोक्तिः कविप्रौढोक्तेरधिकं सहृदयचमत्कारिणीति पृथक्प्रतिपादिता। एषु च अलङ्कृतिव्यञ्जनस्थलेषु रूपकोत्प्रेक्षणव्यतिरेचनादिमात्रस्य प्राधान्यं सहृदयसंवेद्यं न तु रूप्यादीनामित्यलङ्कृतेरेव मुख्यत्वम्"। वृत्तिः "एकः शब्दार्थशक्त्युत्थे"सू० उभयशक्त्युद्भवे व्यङ्ग्ये एकोध्वनेर्भेदः। यथा "हिमकुन्तचन्द्ररुचिरः सपद्मको मदयन् द्विजान् जनितमीनकेतनः'। अभवत् प्रसादितसुरो महोत्सवः प्रमदाजनस्य स चिराय माधवः" ॥ अत्र माधवः कृष्णो माधवो वसन्त इवेत्युपमालङ्कारो व्यङ्ग्यः। एवञ्च व्यङ्ग्यभेदादेव व्यञ्जकानां काव्यानां भेदः"। वृत्तिः "तदष्टादशधा ध्वनिः"सू०। अविवक्षितवाच्योऽर्थान्तरसङ्क्रमितवाच्योऽत्यन्ततिरस्कृतवाच्येति द्विविधः। विवक्षितान्यपरवाच्यस्तु असंलक्ष्यक्रमव्यङ्ग्यत्वेनैकः। संलक्ष्यक्रमव्यङ्ग्यवाच्यत्वेन च शब्दार्थोभयशक्तिमूलतया पञ्चदशेति अष्टादशभेदो ध्वनिः" वृत्तिः एषु च।

"वाक्ये शब्दार्थशक्त्युत्थस्तदन्ये पदवाक्ययोः" सू०।

"तत्र अर्थान्तरसङ्क्रमितवाच्यो ध्वनिः पदगतो यथा। धन्यः स एव तरुणो नयने तस्यैव नयने च। युवजनमोहनविद्या भवितेयं यस्य सम्मुखे सुमुखी"। अत्र द्वितीयनयनशब्दो भाग्यवत्तादिगुणविशिष्टनयनपरः। वाक्यगतो यथा। "त्वामस्मि वच्मि विदुषां समुदायोऽत्र तिष्ठति। आत्मीयां मतिमादाय स्थितिमत्र विधेहि तत्" अत्र प्रतिपाद्यस्य सम्मुखीनत्वादेव लब्धे प्रतिपाद्यत्वे 'त्वामिति' पुनर्वचनमन्यव्यावृत्तिविशिष्टं त्वदर्थं लक्षयति। एवं वच्मीत्यनेनैव कर्त्तरि लब्धे 'अस्मीति' पुनर्व्वचनमन्यव्यावृत्तिविशिष्टं मदर्थं लक्षयति। तथा 'विदुषां समुदाय' इत्यादिवचनेनैव वक्तुः प्रतिपादने सिद्धे पुनः 'वच्मीति' वचनं 'उपदिशामि' इति वचनविशेषरूपमर्थं लक्षयति। एतानि च लक्षितानि स्वातिशयं व्यञ्जयन्ति। एतेन मम वचनं तवात्यन्तं हितं तदवश्यमेतत् कर्त्तव्यमित्यभिप्रायः। तदेवमयं वाक्यगतोऽर्थान्तरसङ्क्रमितवाच्यो ध्वनिः। अत्यन्ततिरस्कृतवाच्यः पदगतो यथा 'निश्वासान्ध इवेत्यादि'। वाक्यगतो यथा। "उपकृतं बहु तत्र किमुच्यते सुजनता प्रथिता भवता परम्। विदधदीदृशमेव सदा सखे! सुखितमास्स्व ततः शरदां शतम्" अन्येषां वाक्यगतत्वे उदाहृतम्। पदगतत्वे यथा। "लावण्यं तदसौ कान्तिस्तद्रूपं स वचःक्रमः। तदा सुधास्पदमभूदधुना तु ज्वरो महान्" अत्र लावण्यादीनां तादृगनुभवैकगोचरताव्यञ्जकानां तदादिशब्दानामेव प्राधान्यम्। अन्येषान्तु तदुपकारित्वमेवेति तन्मूल एव ध्वनिव्यपदेशः। तदुक्तं ध्वनिकृता "एकावयवसंस्थेन भूषणेनेव कामिनी। पदद्योत्येन सुकवेर्ध्वनिना भाति भारती"। एवं भावादिष्वप्यूह्यम्। "भुक्तिमुक्तिकृदेकान्तसमादेशनतत्परः। कस्य नानन्दनिस्यन्दं विदधाति सदागमः"। अत्र सदागमशब्दः सन्निहितमुपनायकं प्रति सच्छास्त्रार्थमभिधाय 'सतः पुरुषस्यागमः' इति वस्तु व्यनक्ति। ननु 'सदागमः सदागम इवेति' न कथमुपमाध्वनिः, सदागमशब्दार्थयोरुपमानोपमेयभावाविवक्षणाद्रहस्यसंगोपनार्थमेव हि द्व्यर्थपदप्रतिपादनं प्रकरणादिपर्य्यालोचनेन च सच्छास्त्राभिधानस्यासम्बन्धत्वात्। "अनन्यसाधारणधीर्धृताखिलवसुन्धरः। राजते कोऽपि जगति स राजा पुरुषोत्तमः"। अत्र पुरुषश्रेष्ठः पुरुषोत्तम इवेत्युपमाध्वनिः। अनयोः शब्दशक्तिमूलौ संलक्ष्यक्रमभेदौ। "सायं स्नानमुपासितं मलयजेनाङ्गं समालेपितं यातोऽस्ताचलमौलिमम्बरमणिर्विस्रब्धमत्रागतिः। आश्चर्य्यं तव सौकुमार्य्यमभितः क्लान्ताऽसि येनाधुना नेत्रद्वन्द्वममीलनव्यतिकरं शक्नोति तेनासितुम्"। अत्र स्वतःसम्भविना वस्तुना कृतपरपुरुषपरिचया क्लान्ताऽसीति वस्तु व्यज्यते। तच्चाधुना क्लान्ताऽसि न तु पूर्वं कदाचिदपि तवैवंविधः क्लमो दृष्टः इति बोधयतोऽधुनापदस्यैवेतरपदार्थोत्कर्षादधुनापदस्यैव पदान्तरापेक्षया वैशिष्ट्यम्। "तदप्राप्तिमहादुःखविलीनाशेषपातका। तच्चिन्ताविपुलाह्लादक्षीणपुण्यचया तथा। चिन्तयन्ती जगत्सूतिं परं ब्रह्मस्वरूपिणम्। निरुच्छासतया मुक्तिं गताऽन्या गोपकन्यका"। अत्राशेषचयपदप्रभावादनेकजन्मसहस्रभोग्यदुष्कृतसुकृतफलराशितादात्म्याध्यवसिततया भगवद्विरहदुःखचिन्ताह्लादयोः प्रत्यायनमित्यतिशयोक्तिद्वयप्रतीतिरशेषचयपदद्वयद्योत्या। अत्र च व्यञ्जकस्य प्रौढोक्तिमन्तरेणापि सम्भवात् स्वतःसम्भविता। "पश्यन्त्यसंख्यपथगां त्वद्दानजलवाहिनीम्। देव! त्रि-